International Journal of Applied Research 2017; 3(4): 178-180



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2017; 3(4): 178-180
www.allresearchjournal.com
Received: 28-02-2017
Accepted: 29-03-2017

**ईशिता हाजरा**
वर्धमानविश्वविद्यालये गवेषणारता

# अभिज्ञानशकुन्तलम् नाटके प्रतिफलित: राजधर्म:

**ईशिता हाजरा**

सारसंक्षेप: - दृश्यकाव्यम् समाजदर्पण:। नाट्यमध्ये जीवनमुखीवास्तवचेतना नाट्यकारेण अनुप्रविश्यते। अभिज्ञानशकुन्तलम् यद्यपि शृङ्गाररसात्मकम् नाटकम् तथापि नाट्यचरित्रस्य कथोपकथनेन तत्कालीनसमाजचित्ररूप: राजधर्म: उपस्थापित:। राजधर्म: अर्थात् राज्ञ: कर्तव्यम्। अमात्यनियोग-करग्रहण-विचारादिकर्मणा प्रजारक्षणम् एव राजधर्मस्य उद्देश्यम्। राजधर्मम् विना समाजजीवनम् न कदापि मङ्गलमार्गे परिचालितम्। अत: कालिदासेन अभिज्ञानशकुन्तलम् नाटके सूक्ष्मरूपेण समाजकल्याणरूपराजधर्म: उपस्थापित:।

नाटकं नाम दृश्यकाव्यम्। दृश्यकाव्यदर्शनार्थम् सामाजिका: रङ्गाभियक्षेत्रे यदा आगछेन्ति तदा अभिनययज्ञेषु नाट्यविषयेषु जीवनवोधप्रत्यक्षार्थम् ते आग्रहिण: सन्ति। नाटकसंज्ञायाम् उक्तम् 'नाटकं ख्यातवृत्तं स्यात्' इति। नाटकं न कदापि कल्पितकाहिनी- अवलम्ब्य संघटते। ख्यातवृत्तेषु यद्यपि ऐतिहासिक-पौराणिक-काहिनी संघटते तथापि तत्र जीवनमुखीवास्तवचेतना नाट्यकारेण अनुप्रविश्यते। अभिज्ञानशकुन्तलम् नाम नाटकम् यद्यपि शृङ्गाररसात्मकम् पौराणिकवृत्तम् तथापि तत्कालीनसमाजचित्ररूप: राजधर्म: अत्र परिस्फुट:।

क: राजा, क: वा तस्य धर्म: ? पृथिवीरक्षार्थम् तथा प्रजारक्षार्थम् व्रह्मणा राजा सृष्ट:। मनुना उक्तम् 'रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभु:'१। राज्ञ: दैव-उत्पत्ति: मनुस्वीकृता। उक्तम् च तेन -

"इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च
चन्द्रवित्तेशायोश्चैव मात्रा निहृत्य शाश्वती:।"२

अभिज्ञानशकुन्तलम् नाटके राज्ञ: उत्पत्तिप्रसङ्गे वैखानसेन अपि उक्तम् 'जन्म यस्य पुरोवंशे'। दुष्यन्त: पुरुवंशश्रेष्ठ: नृपति:, देवतुल्य: तस्य महिमा। अत: ऋषिकुमारेण अपि उक्तम् - 'वलभित्सखो दुष्यन्त:'। राजा दुष्यन्त: स्वतेजसा सर्वजनान् अतिक्रमति।

राज्ञ: धर्म: एव राजधर्म:। अस्मिन् विषये मनुसंहितायाम् टीकाकारेण कुल्लूकभट्टेन अपि उक्तम् - 'राजधर्मान् यद्राज्ञ: कर्तव्यम्, धर्मोशव्दोऽत्र दृष्टादृष्टार्थानुष्ठेयपर।'३ मेधातिथिना धर्मशव्दस्य अर्थप्रसङ्गे उक्तम् - 'कर्तव्यवचनम्'। अत: राज्ञ: कर्तव्यम् एव राजधर्म। यद्वत् सूर्योदयेन अशुभान्धकार: अपसारित: तद्वत् राजधर्मेण अशुभगति: नियन्त्रिता।

**प्रजापालनम्** - राज्ञ: परमधर्मप्रसङ्गे मनुना अपि उक्तम् -'क्षत्रियस्य परोधर्म: प्रजानामेव पालनम्।'४ अभिज्ञानशकुन्तलम् नाटकस्य राज्ञा दुष्यन्तेन राजधर्म: यथार्थेन पालित:। अत: कञ्चुकिना अपि उक्तम् 'कामं धर्मकार्यमनतिपात्यं देवस्य'। राजा क्लेशस्वीकारेणापि सदा कर्तव्यपालने रत:। अत: वैतालिकेन अपि उक्तम् -

"स्वमुनिरभिलाष: खिद्यसे लोकहेतो:।"५

अपि च उक्तम् - 'अविश्रमोहयं लोकतन्त्राधिकार:' अर्थशास्त्रे च उक्तम् -

"प्रजासुखे सुखं राज्ञ: प्रजानां च हिते हितम्
नात्मप्रियं हितं राज्ञ: प्रजानां च प्रियं हितम्।"६

**Correspondence**
**ईशिता हाजरा**
वर्धमानविश्वविद्यालये गवेषणारता

राज्ञा प्रजा: सन्तानवत् पालित:। अत: अभिज्ञाने अपि उक्तम्

"प्रजा: प्रजा: स्वा इव तन्त्रयित्वा
निषेवते श्रान्तमना विविक्तम्।"७

न केवलम् स्वप्रजापालनम् अपि च पृथिवीपालनम् एव राजधर्म:

"नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेक: कृत्स्नां नगरपरिघप्रांशुवाहुर्भुनक्ति।"८

तपोवनादि आश्रम: अपि राज्ञा रक्षित:। शकुन्तलाया: सखीदयेन अपि उक्तम् राजरक्षितव्यानि तपोवनानि नाम। आर्तरक्षणम् एव राजकर्तव्यम्। आपदि विपदि च राजा एव प्रजानां प्रधानसहाय:। अत: ऋषिकुमारौ उक्तौ

"आपन्नाभयसत्रेषु दीक्षिता: खलु पौरवा:।"९

वैखानसेन राजकर्तव्यज्ञापनार्थम् उक्तम् -

"आर्तत्राणाय व: शस्त्रं न प्रहर्तुमनागसि।"१०

वैखानसस्य आदेशवचनम् राज्ञा दुष्यन्तेन यथार्थेन पालितम्। अत: मातलिमुखात् श्रूयते-

"आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम्।"११

राजधर्मस्य अपालने राज्यस्य प्रजानां च अमङ्गलम् संघटितम्। रामायणे अपि उक्तम् -

"राजदोषै र्विपद्यन्ते प्रजा ह्यविधिपालिता:
असद्वृत्ते हि नृपतौ अकाले म्रियते जन:।"१२

राघवभट्टेन अपि उक्तम् -

"राज्ञोपचारात् पृथिवी स्वल्पशस्या भवेत् किल
अल्पायुष: प्रजा: सर्वा दारिद्रा: व्याधिपीडिता:।"१३

अत: राजा सदा स्वधर्मपालने रत:।

**युद्धनीति:** - युद्धेष्वपारङ्मुखत्वं अपि राजकर्तव्यम्। मनुसंहितायाम् अपि उक्तम् -

"संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्
शुश्रूषा व्राह्मणानां च राज्ञां श्रेयस्करं परम्।"१४

अभिज्ञानशकुन्तलम् नाटकस्य दुष्यन्तचरित्रे अपि युद्धेष्वपारङ्मुखत्वरूपं राजधर्म: प्रतिफलित:। अत: अभिज्ञानशकुन्तलम् नाटके अपि उक्तम् -

"पुत्रस्य ते रणशिरस्यायमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता।।"१५

राक्षसादि-उपद्रवनिवारणे दुष्यन्त: सदा व्यापृत:। तेन कण्वाश्रमस्य राक्षसा: निहता: अपि च स्वर्गस्य कालनेमि इति दानवस्य उपद्रव: प्रतिहत:। अत: ऋषिकुमारेण अप उक्तम्- 'आपन्नाभयत्रेषु दीक्षिता खलु पौरवा:।'१६

विचारकार्यम् - न केवलम् प्रजापालनम् विचारकार्यपरिचालनम् एव राज्ञ: कर्तव्यम्। विचारव्यवस्थाया: प्रधान: एव राजा। मनुना अपि उक्तम् -

"शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा
प्रणेतुं शक्यते दण्ड: सुमहायेन धीमता।।"१७

विचारादिकार्येण प्रजारक्षणाय दण्ड: सृष्ट:। अत: मनुसंहितायाम् अपि कथितम् - 'दण्डस्य हि भयात् सर्वं जगत् भोगाय कल्पते।'१८ अभिज्ञाने अपि उक्तम् -

"नियमयसि कुमार्गप्रस्थितानात्तदण्ड:
प्रशमयसि विवादं कल्पसे रक्षणाय।।"१९

प्राचीनकाले चौर्यापराधेन वधदण्ड: अपि समाजे प्रचलित:। उक्तञ्च अभिज्ञाने -

"स्फुरत: मे हस्तौ तस्य वधार्थं सुमनस: पिनद्धुम्।"२०

वधदण्डस्य उपाय: अपि नाटके लक्ष्यते-

"गृध्रवलि: भविष्यसि, शुनो मुखं वा द्रस्यसि।"२१

अपराधिनम् प्रति वधदण्ड:, अपि च निरपराधिनम् प्रति पुरस्कारं अपि समाजे प्रचलित:। अभिज्ञाने अपि उक्तम् -

"एष भर्ता अङ्गुलीयकमूल्यसम्मित: प्रसाद: अपि दापित:।"२२

उत्तराधिकार-आइनानुसारेण गर्भस्थशिशु: अपि परलोकगतापितृसम्पद: उत्तराधिकारिरूपेण विवेचित:। अत: दुष्यन्तेन अपि उक्तम् - 'ननु गर्भ: पित्र्यं रिक्थमर्हति।'

अमात्यनियोग: - 'सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।'२३

अमात्यादिराजकर्मचारिसहायताम् विना राजधर्म: यथार्थेन न परिचालित:। अत: योग्य-अमात्यनियोग: अपि राज्ञ: कर्तव्य:। मनुना अपि उक्तम् -

"अपि यत् सुकरं कर्म तद्प्येकेन दुष्करम्।
विशेषतोऽसहायेन किमु राज्यं महोदयम्।"२४

अभिज्ञानशकुन्तलम् नाटके राज्ञा दुष्यन्तेन पिशुन: अमात्यरूपेण निर्वाचित:। राजस्वगणनादिकार्यम् अमात्येन परिचालितम्। प्रयोजनावशात् विचारादिकार्यम् अपि अमात्य अर्पितम्। अत: उक्तम् अमात्य: विज्ञापयति - अर्थजातस्य गणनावहुलतया एकम् एव पौरकार्यम् अवेक्षितम्।' प्रयेजने अमात्ये अपि प्रजापालनरूपं दायित्वम् अर्पितम्।

"त्वन्मति: केवला तावत् परिपालयतु प्रजा:।"२५

**करविधि:** – राज्यशासनाय प्रजाकल्याणाय च अर्थस्य प्रयोजनम्। अत: राजधर्मपालनाय शास्त्रानुसारेण करम् गृहीतम्। मनुना अपि उक्तम् –

"यथा फलेन युज्येत राजा कर्ता च कर्मणाम्
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्।"२६

रघुवंशम् महाकाव्ये करग्रहणप्रसङ्गे कालिदासेन उक्तम् –

"सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रवि:।"२७

तदानीमतने काले राज्ञा उत्पादितद्रव्यस्य एक-षष्ठांश: कररूपेण गृहीत:। अत: उक्तम् – 'षष्ठांशवृत्तेरपि एष धर्म:' किन्तु मुनिऋषिणा सञ्चितपुण्यफलस्य एकषष्ठांश: कररूपेण प्रदत्त:। अत: उक्तम् –

"यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तद्धनम्
तप: षड्भागमक्षय्यं ददत्यारण्यका हि न:।।"२८

**राजधर्मपालनस्य मूल:तत्त्वम्** – राजधर्मपालनस्य मूल: एव विनय:। मनुना अपि उक्तम् – 'विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्।' विनयादिधर्म: दुष्यन्तचरित्रे लक्ष्यते। अत: वैखानसस्य आदेशपालनाय राजा मृगहनने निवृत्त:। कण्वाश्रमस्य आगतब्राह्मणा: तेन यथायोग्येसम्मानेन भूषिता:। अत: शार्ङ्गरवेण 'स्वभाव एवैष परोपकारिणाम्' इत्युक्त्वा राज्ञ: विनयादिधर्म: स्वीकृता:।
अभिज्ञानशकुन्तलम् आपातेन शृङ्गाररसात्मकमनाटकम्। नायक-नायिकाया: प्रेमोन्मेष-विरह-पुनर्मिलनेन नाटकस्य घटनाचक्रम् आवर्तितम्। तथापि नाट्यचरित्रस्य कथोपकथनेन परोक्षरूपेण तत्कालीनसमाजचित्ररूप: राजधर्म: उपस्थापित:। राजधर्मस्य मूललक्ष्यम् प्रजारक्षणम् समाजकल्याणम् च। प्राचीननाट्यकारेण समाजकल्याणस्य उपाय: नाटकमध्ये सूक्षरूपेण अनुप्रविष्ट:। तदुपायग्रहणेन वर्तमानसमाजस्य मङ्गलम् अपि सम्भवति।

।। **तथ्यसूत्रम्**।।

१। मनुसंहिता ७/३।
२। मनुसंहिता ७/४।
३। मनुसंहिता कुल्लूकटीका
४। मनुसंहिता ७/१४४।
५। अभिज्ञानशकुन्तलम् ५/७।
६। अर्थशास्त्रम् विनयाधिकारिकम् १६ प्रकरण।
७। अभिज्ञानशकुन्तलम् ५/५।
८। अभिज्ञानशकुन्तलम् २/१५।
९। अभिज्ञानशकुन्तलम् २/१६।
१०। अभिज्ञानशकुन्तलम् १/११।
११। अभिज्ञानशकुन्तलम् १/११।
१२। रामायणम् उत्तरकाण्ड ७३।
१३। अभिज्ञान राघवटीका।
१४। मनुसंहिता ७/८८।
१५। अभिज्ञानशकुन्तलम् ७/२६।
१६। अभिज्ञानशकुन्तलम् २/१६।
१७। मनुसंहिता ७/३१।
१८। मनुसंहिता ७/२२।
२९। अभिज्ञानशकुन्तलम् ५/८।
२०। अभिज्ञानशकुन्तलम् षष्ठ अङ्क:।
२१। अभिज्ञानशकुन्तलम् षष्ठ अङ्क:।
२२। अभिज्ञानशकुन्तलम् षष्ठ अङ्क:।
२३। अर्धशास्त्रम् विनयाधिकारिकम् ३ प्रकरणम्।
२४। मनुसंहिता ७/५५।
२५। अभिज्ञानशकुन्तलम् ६/३२।
२६। मनुसंहिता ७/१२८।
२७। रघुवंशम्।
२८। अभिज्ञानशकुन्तलम् २/१३।

।। **आलोचितग्रन्था:**।।


| | | |
|---|---|---|
| चक्रवर्ती, सत्यनारायण | अभिज्ञानशकुन्तलम् | संस्कृत पुस्तक भाण्डार,१९९९। |
| वन्द्योपाध्याय, मानवेन्दु | कौटिलीयम् अर्थशास्त्रम् | संस्कृत पुस्तक भाण्डार, २००१। |
| वसु, अनिलचन्द्र | अभिज्ञानशकुन्तलम् | संस्कृत वुक डिपो, २००३। |
| वसु, अनिलचन्द्र | मनुसंहिता | संस्कृत वुक डिपो २००२। |
| वसु, राजशेखर | रामायणम् | एम.सि.सरकार एण्ड सन्स, प्राइभेट लिमिटेड, १३५४। |
| वसु, राजशेखर | महाभारत्म् | एम.सि.सरकार एण्ड सन्स, प्राइभेट लिमिटेड, १३५६। |